श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधि स्वामिना विरचितम्

# ॥ सुन्दरबाहुदशकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ सुन्दरबाहुदशकम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

लक्ष्मीमुग्धनिवासपर्वत इति प्रावोचमीषत्स्वनः
लक्ष्मीमुग्ध उपेत्य तूर्णमविशत् पूर्णं मदीयं मनः।
लक्ष्मीमुग्धहृदो ममापि यदि चेत्सेयं दशा का पुनः
लक्ष्मीमुग्धपदाब्जमुग्धमनसः कारेरपत्यस्य नः॥ १ ॥

वने भवाख्ये परितोऽविरामं
भयङ्करे हन्त! सदा भ्रमन्तम्।
वनाद्रिवासिन्नतिसुन्दराङ्ग!
त्वदङ्घ्रिपद्मैकरतिं विधेयाः॥ २ ॥

वने वने सन्ति धराधरेन्द्राः
वनानि भूयांसि च तेषु तेषु।
वनाद्रिनामा पुनरेष शैलः
वनं च वृक्षाश्च गिरिर्भवान् यत्॥ ३ ॥

सौन्दर्यमाधुर्यमयीमये! त्वं
मूर्तिं समाधाय गिरावमुष्मिन्।
उद्यानसौन्दर्ययुते विहारं
गङ्गाम्बुमाधुर्ययुते विधत्से॥ ४ ॥

श्रीचापपुर्यां मम तातपादैः
सन्दर्शितं ते भगवन्! गिरीन्द्रम्।
आसेव्य नित्यं पुलकाङ्कितोऽहम्
अत्यन्तमानन्दनिधिर्भवामि॥ ५ ॥

www.prapatti.com

धनुष्पुरेऽस्मिन् बहुमानभूमा
ममान्तरेवं वनशैलनाथ!।
गिरिस्त्वदीयो नयनद्वयं यत्
आनन्दयत्यत्र सतो जनस्य॥ ६ ॥

गिरीशोऽयं सत्यं तव गिरिरसौ सुन्दरहरे!
भवन्मूर्तिं हृद्यां भजति निजपार्श्वेन नियतम्।
वहत्येनां गङ्गां निजशिरसि लीनामृतकरः
महानार्यामोदं कलयति सदा यत्स्ववपुषा॥ ७ ॥

ज्योतिर्ज्योतिरिति श्रुतिर्वदति यत् ब्रह्माहमेवास्मि तज्-
ज्योतिर्मूर्तिरनेकधावगमनः सौन्दर्यसाराकृतिः।
अत्यन्तोन्नतविस्तृतातिनिविडच्छायैर्द्रुमैरावृते
शैलेऽस्मिन्निति वक्ति मङ्गलनिधिः श्रीमान् वनाद्रीश्वरः॥ ८ ॥

वृषभभूधररत्नविभूषणं
वृषभवाहधनुः परिभञ्जनात्।
वृषभमर्दनतश्च वृताङ्गनं
वृषभमेकमहं शरणं भजे॥ ९ ॥

नूपुरगङ्गासलिलासक्तेः
नूपुरनादे लक्ष्म्यास्सरतेः।
नूपुरदृष्टेर्नन्दितसौरेः
नूपुररम्यं पादमुपासे॥ १० ॥

सुन्दरबाहोर्दशकं
सुन्दरवल्लीसुतेन मानिधिना।
सुन्दरमेतद्रचितं
सुन्दरसम्पत्समूहदं पठताम्॥ ११ ॥

॥ इति सुन्दरबाहुदशकं समाप्तम्॥

www.prapatti.com